# श्री लक्ष्मीनृसिंह पंचरत्नं

त्वत्प्रभु जीव प्रियमिच्छसि चेन्नरहरि पूजां कुरु! सततं
प्रति बिंबालंकृति धृति कुशलो बिंबालंकृति मातनुते ।
चेतोभृंग! भ्रमसि वृथा भव मरुभूमौ विरसायां
भज! भज! लक्ष्मीनरसिंहानघ पदसरसिज मकरंदम् ॥ 1

शुक्तौ रजत प्रतिभा जाता कटकाद्यर्थ समर्था चेत्
दुःखमयी ते संसृतिरेषा निर्वृतिदाने निपुणा स्यात् ।
चेतोभृंग! भ्रमसि वृथा भव मरुभूमौ विरसायां
भज! भज! लक्ष्मीनरसिंहानघ पदसरसिज मकरंदम् ॥ 2

आकृतिसाम्याच्छाल्मलिकुसुमे स्थलनलिनत्व भ्रममकरोः
गंधरसाविह किमु विद्येते विफलं भ्राम्यसि भृशविरसेऽस्मिन् ।
चेतोभृंग! भ्रमसि वृथा भव मरुभूमौ विरसायां
भज! भज! लक्ष्मीनरसिंहानघ पदसरसिज मकरंदम् ॥ 3

स्रक्चंदन वनितादी न् विषयान् सुखदान् मत्वा तत्र विहरसे
गंधफली सदृशा ननु तेऽमी भोगानंतर दुःखकृतः स्युः ।
चेतोभृंग! भ्रमसि वृथा भव मरुभूमौ विरसायां
भज! भज! लक्ष्मीनरसिंहानघ पदसरसिज मकरंदम् ॥ 4

© 2022 Vedam Nadam

तव हितमेकं वचनं वक्ष्ये शृणु! सुखकामो यदि सततं
स्वप्ने दृष्टं सकलं हि मृषा जाग्रति च स्मर! तद्वदिति ।
चेतोभृंग! भ्रमसि वृथा भव मरुभूमौ विरसायां
भज! भज! लक्ष्मीनरसिंहानघ पदसरसिज मकरंदम् ॥ 5

॥ इति श्रीमच्छंकर भगवतः कृतौ श्री लक्ष्मीनृसिंह पंचरत्नं संपूर्णम् ॥